# श्रीकृष्णद्वैपायनकृतब्रह्मसूत्राणि

## *BADARAYANA'S*
# *BRAHMASUTRAS*

Badarayana's Brahmasutras(E-Book)
(in Devanagari Lipi)

Published by : Madhva Library ( http://www.madhvalibrary.org)

Typeset by: Smt Jayashree Madhusudan

Edited by : Madhusudan Bheemasenarao

No of Pages : 58

© Madhva Library.

If you notice , any error please inform us .
We will correct them on top priority
.

# श्रीकृष्णद्वैपायनकृतब्रह्मसूत्राणि

## प्रथमाध्यायः-समन्वयाध्यायः

## १ प्रथमः पादः- अन्यत्र प्रसिद्धनामपादः

### १ ।१ ।१ जिज्ञासाधिकरणम्

००१ ॥ॐ ॐ अथातो ब्रह्मजिज्ञासा ॐ ॥

### १ ।१ ।२ जन्माधिकरणम्

००२ ॥ ॐ जन्माद्यस्य यतः ॐ ॥

### १ ।१ ।३ शास्त्रयोनित्वाधिकरणम्

००३ ॥ ॐ शास्त्रयोनित्वात् ॐ ॥

### १ ।१ ।४ समन्वयाधिकरणम्

००४ ॥ ॐ तत्तु समन्वयात् ॐ ॥

### १ ।१ ।५ ईक्षत्यधिकरणम्

००५ ॥ ॐ ईक्षतेर्नाशब्दम् ॐ ॥

००६ ॥ ॐ गौणश्चेन्नात्मशब्दात् ॐ ॥

००७ ॥ ॐ तन्निष्ठस्य मोक्षोपदेशात् ॐ ॥

००८ ॥ ॐ हेयत्वावचनाच्च ॐ ॥

००९ ॥ ॐ स्वाप्ययात् ॐ ॥

०१० ॥ ॐ गतिसामान्यात् ॐ ॥

०११ ॥ ॐ श्रुतत्वाच्च ॐ ॥

## १ ।१ ।६ आनन्दमयाधिकरणम्

०१२ ॥ ॐ आनन्दमयोऽभ्यासात् ॐ ॥

०१३ ॥ ॐ विकारशब्दान्नेतिचेन्न प्राचुर्यात् ॐ ॥

०१४ ॥ ॐ ॐ तद्धेतुव्यपदेशाच्च ॐ ॥

०१५ ॥ ॐ मान्त्रवर्णिकमेव च गीयते ॐ ॥

०१६ ॥ ॐ नेतरोऽनुपपत्ते ॐ ॥

०१७ ॥ ॐ ॐ भेदव्यपदेशाच्च ॐ ॥

०१८ ॥ ॐ कामाच्च नानुमानापेक्षा ॐ ॥

०१९ ॥ ॐ अस्मिन्नस्य च तद्योगं शास्ति ॐ ॥

## १ ।१ ।७ अन्तस्थत्वाधिकरणम्

०२० ॥ ॐ अनन्तस्तद्धर्मोपदेशात् ॐ ॥

०२१ ॥ ॐ भेदव्यपदेशाच्चान्यः ॐ ॥

## १ ।१ ।८ आकाशाधिकरणम्

०२२ ॥ ॐ आकाशस्तल्लिङ्गात् ॐ ॥

## १ ।१ ।९ प्राणाधिकरणम्

०२३ ॥ ॐ अत एव प्राणः ॐ ॥

## १ ।१ ।१० ज्योतिरधिकरणम्

०२४ ॥ ॐ ज्योतिश्चरणाभिधानात् ॐ ॥

## १ ।१ ।११ गायत्र्यधिकरणम्

०२५ ॥ ॐ छन्दोऽभिधानान्नेतिचेन्न तथा चेतोऽर्पणनिगदात्तथा हि दर्शनम् ॐ ॥

०२६ ॥ ॐ भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॐ ॥

०२७ ॥ ॐ उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॐ ॥

## १ ।१ ।१२ पादान्तप्राणाधिकरणम्

०२८ ॥ ॐ प्राणस्तथानुगमात् ॐ ॥

०२९ ॥ ॐ न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् ॐ ॥

०३० ॥ ॐ शास्त्रदृष्ट्यातूपदेशो वामदेववत् ॐ ॥

०३१ ॥ ॐ जीवमुख्यप्राणलिङ्गान्नेतिचेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॐ ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु प्रथमाध्यायस्य

प्रथमः पादः ॥१ ॥१ ॥

# श्रीकृष्णद्वैपायनकृतब्रह्मसूत्राणि

## प्रथमाध्यायः-समन्वयाध्यायः

## २ द्वितीयः पादः-अन्यत्र प्रसिद्धलिङ्गपादः

### १ ।२ ।१ । सर्वगतत्वाधिकरणम्

०३२ ॥ ॐ सर्वत्र प्रसिद्धोपदेशात् ॐ ॥

०३३ ॥ ॐ विवक्षितगुणोपपत्तेश्च ॐ ॥

०३४ ॥ ॐ अनुपपत्तेस्तु न शारीरः ॥

०३५ ॥ ॐ कर्मकर्तृव्यपदेशाच्च ॐ ॥

०३६ ॥ ॐ शब्दविशेषात् ॐ ॥

०३७ ॥ ॐ स्मृतेश्च ॐ ॥

०३८ ॥ ॐ अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेतिचेन्न निचाय्यत्वादेवं व्योमवच्च ॐ ॥

०३९ ॥ ॐ सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ॐ ॥

### १ ।२ ।२ अत्तृत्वाधिकरणम्

०४० ॥ ॐ अत्ताचराचरग्रहणात् ॐ ॥

०४१ ॥ ॐ प्रकरणाच्च ॐ ॥

### १ ।२ ।३ गुहाधिकरणम्

०४२ ॥ ॐ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॐ ॥

०४३ ॥ ॐ विशेषणाच्च ॐ ॥

## १ ।२ ।४ अन्तराधिकरणम्

०४४ ॥ ॐ अन्तर उपपत्तेः ॐ ॥

०४५ ॥ ॐ स्थानादिव्यपदेशाच्च ॐ ॥

०४६ ॥ ॐ सुखविशिष्टाभिधानादेव च ॐ ॥

०४७ ॥ ॐ श्रुतोपनिषत्कगत्यभिधानाच्च ॐ ॥

०४८ ॥ ॐ अनवस्थितेरसम्भवाच्च नेतरः ॐ ॥

## १ ।२ ।५ अन्तर्याम्यधिकरणम्

०४९ ॥ ॐ अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॐ ॥

०५० ॥ ॐ न च स्मार्तमतद्धर्माभिलापात् ॐ ॥

०५१ ॥ ॐ शरीरश्चोभयेऽपि हि भेदेनैनमधीयते ॐ ॥

## १ ।२ ।६ अदृश्यत्वाधिकरणम्

०५२ ॥ ॐ अदृश्यत्वादिगुणको धर्मोक्तेः ॐ ॥

०५३ ॥ ॐ विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॐ ॥

०५४ ॥ ॐ रूपोपन्यासाच्च ॐ ॥

## १ ।२ ।७ वैश्वानराधिकरणम्

०५५ ॥ ॐ वैश्वानरः साधारणशब्दविशेषात् ॐ ॥

०५६ ॥ ॐ स्मर्यमाणमनुमानं स्यादिति ॐ ॥

०५७ ॥ ॐ शब्दादिभ्योऽन्तः प्रतिष्ठानान्नेतिचेन्न तथा

दृष्ट्युपदेशादसंभवात्पुरुषविधमपि चैनमधीयते ॐ ॥

०५८ ॥ ॐ अत एव न देवता भूतं च ॐ ॥

०५९ ॥ ॐ साक्षादप्यविरोधं जैमिनिः ॐ ॥

०६० ॥ ॐ अभिव्यक्तोरित्याश्मरथ्यः ॐ ॥

०६१ ॥ ॐ अनुस्मृतेर्बादरिः ॐ ॥

०६२ ॥ ॐ सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति ॐ ॥

०६३ ॥ ॐ आमनन्ति चैनमस्मिन् ॐ ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु प्रथमाध्यायस्य

द्वितीयः पादः ॥१ ॥ २ ॥

www.madhvalibrary.org

# श्रीकृष्णद्वैपायनकृतब्रह्मसूत्राणि

## प्रथमाध्यायः –समन्वयाध्यायः

## ३ तृतियःपादः–उभयत्र प्रसिद्धनामलिङ्गपादः

### १ ।३ ।१ द्युभ्वाद्याधिकरणम्

०६४ ॥ ॐ द्युभ्वाद्यायतनं स्वशब्दात् ॐ ॥

०६५ ॥ ॐ मुक्तोपसृप्यव्यपदेशात् ॐ ॥

०६६ ॥ ॐ नानुमानमतच्छब्दात् ॐ ॥

०६७ ॥ ॐ प्राणभृच्च ॐ ॥

०६८ ॥ ॐ भेदव्यपदेशात् ॐ ॥

०६९ ॥ ॐ प्रकरणात् ॐ ॥

०७० ॥ ॐ स्थित्यदनाभ्यां च ॐ ॥

### १ ।३ ।२ भुमाधिकरणम्

०७१ ॥ ॐ भूमासम्प्रसादादध्युपदेशात् ॐ ॥

०७२ ॥ ॐ धर्मोपपत्तेश्च ॐ ॥

### १ ।३ ।३ अक्षराधिकरणम्

०७३ ॥ ॐ अक्षरमम्बरान्तधृतेः ॐ ॥

०७४ ॥ ॐ सा च प्रशासनात् ॐ ॥

०७५ ॥ ॐ अन्यभावव्यावृत्तेश्च ॐ ॥

## १ ।३ ।४ सदधिकरणम्

०७६ ॥ ॐ ईक्षति कर्मव्यपदेशात्सः ॐ ॥

## १ ।३ ।५ दहराधिकरणम्

०७७ ॥ ॐ दहर उत्तरेभ्यः ॐ ॥

०७८ ॥ ॐ गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च ॐ ॥

०७९ ॥ ॐ धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॐ ॥

०८० ॥ ॐ प्रसिद्धेश्च ॐ ॥

०८१ ॥ ॐ इतरपरामर्शात्स इति चेन्नासम्भवात् ॐ ॥

०८२ ॥ ॐ उत्तराच्चेदाविर्भूतस्वरूपस्तु ॐ ॥

०८३ ॥ ॐ अन्यार्थश्च परामर्शः ॐ ॥

०८४ ॥ ॐ अल्पश्रुतेरिति चेत्तदुक्तम् ॐ ॥

## १ ।३ ।६ अनुकृत्यधिकरणम्

०८५ ॥ ॐ अनुकृतेस्तस्य च ॐ ॥

०८६ ॥ ॐ अपि स्मर्यते ॐ ॥

## १ ।३ ।७ वामनाधिकरणम्

०८७ ॥ ॐ शब्दादेव प्रमितः ॐ ॥

०८८ ॥ ॐ हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॐ ॥

## १ ।३ ।८ देवताधिकरणम्

०८९ ॥ ॐ तदुपर्यपि बादरायणः सम्भवात् ॐ ॥

०९० ॥ ॐ विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॐ ॥

०९१ ॥ ॐ शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् ॐ ॥

०९२ ॥ ॐ अत एव च नित्यत्वम् ॐ ॥

०९३ ॥ ॐ समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च ॐ ॥

०९४ ॥ ॐ मध्वादिष्वसम्भवादनधिकारं जैमिनिः ॐ ॥

०९५ ॥ ॐ ज्योतिषि भावाच्च ॐ ॥

०९६ ॥ ॐ भावं तु बादरायणोऽस्ति हि ॐ ॥

## १ ।३ ।९ अपशूद्राधिकरणम्

०९७ ॥ ॐ शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि ॐ ॥

०९८ ॥ ॐ क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॐ ॥

०९९ ॥ ॐ संस्कारपरामर्शात्तदभावाभिलापाच्च ॐ ॥

१०० ॥ ॐ तदभावनिर्धारणे च प्रवृत्तेः ॐ ॥

१०१ ॥ ॐ श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च ॐ ॥

## १ ।३ ।१० कम्पनाधिकरणम्

१०२ ॥ ॐ कम्पनात् ॐ ॥

## १ ।३ ।११ ज्योतिरधिकरणम्

१०३ ॥ ॐ ज्योतिर्दर्शनात् ॐ ॥

## १ ।३ ।१२ आकाशाधिकरणम्

१०४ ॥ ॐ आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॐ ॥

## १ ।३ ।१३ सुषुप्त्यधिकरणम्

१०५ ॥ ॐ सुषुप्त्युत्क्रान्त्योर्भेदेन ॐ ॥

## १ ।३ ।१४ ब्राह्मणाधिकरणम

१०६ ॥ ॐ पत्यादिशब्देभ्यः ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु प्रथमाध्यायस्य

तृतीयः पादः ॥१ ॥ ३ ॥

# श्रीकृष्णद्वैपायनकृतब्रह्मसूत्राणि

## प्रथमाध्यायः -समन्वयाध्यायः

## ४ चतुर्थःपादः- अन्यत्रैव प्रसिद्धनामलिङ्गपादः

### १ ।४ ।१ अनुमानिकाधिकरणम्

१०७ ॥ ॐ आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॐ ॥

१०८ ॥ ॐ सूक्ष्मं तु तदर्हत्वात् ॐ ॥

१०९ ॥ ॐ तदधीनत्वादर्थवत् ॐ ॥

११० ॥ ॐ ज्ञेयत्वावचनाच्च ॐ ॥

१११ ॥ ॐ वदतीति चेन्न प्राज्ञो हि ॐ ॥

११२ ॥ ॐ प्रकरणात् आम् ॥

११३ ॥ ॐ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॐ ॥

११४ ॥ ॐ महद्वच्च ॐ ॥

११५ ॥ ॐ चमसवदविशेषात् ॐ ॥

### १ ।४ ।२ ज्योतिरुपक्रमाधिकरणम्

११६ ॥ ॐ ज्योतिरूपक्रमात्तु तथा ह्यधीयत एके ॐ ॥

११७ ॥ ॐ कल्पनोपदेशाच्च मध्वादिवदविरोधः ॐ ॥

## १।४।३ न सङ्ख्योपसङ्ग्रहधिकरणम्

११८ ॥ ॐ न सङ्ख्योपङ्ग्रहादपि नानाभावादतिरेकाच्च ॐ ॥

११९ ॥ ॐ प्राणादयो वाक्यशेषात् ॐ ॥

१२० ॥ ॐ ज्योतिषैकेषामसत्यन्ने ॐ ॥

## १।४।४ आकाशाधिकरणम्

१२१ ॥ ॐ कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्तेः ॐ ॥

## १।४।५ समाकर्षाधिकरणम्

१२२ ॥ ॐ समाकर्षात् ॐ ॥

१२३ ॥ ॐ जगद्वाचित्वात् ॐ ॥

१२४ ॥ ॐ जीवमुख्यप्राणलिंगादिति चेत्तद्व्याख्यातम् ॐ ॥

१२५ ॥ॐ अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॐ ॥

१२६ ॥ॐ वाक्यान्वयात् ॐ ॥

१२७ ॥ ॐ प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॐ ॥

१२८ ॥ ॐ उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॐ ॥

१२९ ॥ ॐ अवस्थितेरिति काशकृत्स्नः ॐ ॥

## १।४।६ प्रकृत्यधिकरणम्

१३० ॥ ॐ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॐ ॥

१३१ ॥ ॐ अभिध्योपदेशाच्च ॐ ॥

१३२ ॥ ॐ साक्षाच्चोभ्याम्नानात् ॐ ॥

१३३ ॥ ॐ आत्मकृतेः परिणामात् ॐ ॥

१३४ ॥ ॐ योनिश्च हि गीयते ॐ ॥

## १ ।४ ।७ एतेन सर्व व्याख्याताधिकरणम्

१३५ ॥ ॐ एतेन सर्वे व्याख्याता व्याख्याताः ॐ ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु प्रथमाध्यायस्य

चतुर्थः पादः ॥ १ ॥ ४ ॥

# श्रीकृष्णद्वैपायनकृतब्रह्मसूत्राणि

## द्वितियोऽध्यायः -अविरोधाध्यायः

### १ प्रथमः पादः-युक्तिपादः

#### २ ।१ ।१ स्मृत्यधिकरणम्

१३६ ॥ ॐ स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॐ ॥

१३७ ॥ ॐ इतरेषां चानुपलब्धेः ॐ ॥

१३८ ॥ ॐ एतेन योगः प्रत्युक्तः ॐ ॥

#### २ ।१ ।२ न विलक्षणत्वाधिकरणम्

१३९ ॥ ॐ न विलक्षणत्वादस्य तथात्वं च शब्दात् ॐ ॥

१४० ॥ ॐ दृश्यते तु ॐ ॥

#### २ ।१ ।३ अभिमान्यधिकरणम्

१४१ ॥ ॐ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॐ ॥

१४२ ॥ ॐ दृश्यते च ॐ ॥

#### २ ।१ ।४ असदधिकरणम्

१४३ ॥ ॐ असदिति चेन्नप्रतिषेधमात्रत्वात् ॐ ॥

१४४ ॥ ॐ अपितौ तद्वत्प्रसङ्गादसमञ्जसम् ॐ ॥

१४५ ॥ ॐ न तु दृष्टान्तभावात् ॐ ॥

१४६ ॥ ॐ स्वपक्षदोषाच्च ॐ ॥

१४७ ॥ ॐ तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः ॐ ॥

१४८ ॥ ॐ एतेने शिष्टा अपरिग्रहा अपि व्याख्याताः ॐ ॥

## २ ।१ ।५ भोक्त्राधिकरणम्

१४९ ॥ ॐ भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॐ ॥

## २ ।१ ।६ आरम्भणाधिकरण

१५० ॥ ॐ तदनन्यत्वमारम्भणशब्दादिभ्यः ॐ ॥

१५१ ॥ ॐ भावे चोपलब्धेः ॐ ॥

१५२ ॥ ॐ सत्वाच्चावरस्य ॐ ॥

१५३ ॥ ॐ असद्व्यपदेशान्नेतिचेन्न धर्मान्तरेण वाक्यशेषात् ॐ ॥

१५४ ॥ ॐ युक्तेः शब्दान्तराच्च ॐ ॥

१५५ ॥ ॐ पटवच्च ॐ ॥

१५६ ॥ ॐ यथा प्राणादिः ॐ ॥

## २ ।१ ।७ इतरव्यपदेशाधिकरणम्

१५७ ॥ ॐ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॐ ॥

१५८ ॥ ॐ अधिकं तु भेदनिर्देशात् ॐ ॥

१५९ ॥ ॐ अश्मादिवच्च तदनुपपत्तिः ॐ ॥

१६० ॥ ॐ उपसंहारदर्शनान्नेतिचेत्क्षीरवद्धि ॐ ॥

१६१ ॥ ॐ देवादिवदपि लोके ॐ ॥

१६२ ॥ ॐ कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॐ ॥

## २ ।१ ।८ श्रुत्यधिकरणम्

१६३ ॥ ॐ श्रुतेस्तु शब्दमूलत्वात् ॐ ॥

१६४ ॥ ॐ आत्मानि चैवं विचित्राश्च हि ॐ ॥

१६५ ॥ ॐ स्वपक्षदोषाच्च ॐ ॥

१६६ ॥ ॐ सर्वोपेता च तद्दर्शनात् ॐ ॥

१६७ ॥ ॐ विकरणत्वान्नेतिचेत्तदुक्तम् ॐ ॥

## २ ।१ ।९ न प्रयोजनवत्वाधिकरणम्

१६८ ॥ ॐ न प्रयोजनवत्वात् ॐ ॥

१६९ ॥ ॐ लोकवत्तु लीलाकैवल्यम् ॐ ॥

## २ ।१ ।१० वैषम्य नैर्घृण्याधिकरणम्

१७० ॥ ॐ वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॐ ॥

१७१ ॥ ॐ न कर्माविभागादिति चेन्नानदित्वात्  ॐ ॥

१७२ ॥ ॐ उपपद्यते चाप्युपलभ्यते च ॐ ॥

## २ ।१ ।११ सर्वधर्मोपपत्यधिकरणम्

१७३ ॥ ॐ सर्वधर्मोपपत्तेश्च ॐ ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषुद्वितियाध्यायस्य

प्रथमः पादः ॥ २ ॥१ ॥

# श्रीकृष्णद्वैपायनकृतब्रह्मसूत्राणि

## द्वितियोऽध्यायः-अविरोधाध्यायः

## २ द्वितीयः पादः-समयपादः

### २।२।१ रचनाधिकरणम्

१७४ ॥ ॐ रचनानुपपत्तेश्च नानुमानम् ॐ ॥

१७५ ॥ ॐ प्रवृत्तेश्च ॐ ॥

१७६ ॥ ॐ पयोऽम्बुवच्चेत्तत्रापि ॐ ॥

१७७ ॥ ॐ व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॐ ॥

### २।२।२ अन्यत्राभावाधिकरणम्

१७८ ॥ ॐ अन्यत्राभावाच्च न तृणादिवत् ॐ ॥

### २।२।३ अभ्युपगमाधिकरणम्

१७९ ॥ ॐ अभ्युपगमोऽप्यर्थाभावात् ॐ ॥

### २।२।४ पुरुषाश्माधिकरणम्

१८० ॥ ॐपुरूषाश्मवदिति चेत्तथापि ॐ ॥

१८१ ॥ ॐ अङ्गित्वानुपपत्तेः ॐ ॥

### २।२।५ अन्यथाऽनुमित्यधिकरणम्

१८२ ॥ ॐ अन्यथानुमितौ च ज्ञशक्तिवियोगात् ॐ ॥

१८३ ॥ ॐ विप्रतिषेधाच्चासमञ्जसम् ॐ ॥

## २।२।६ वैशेषिकाधिकरणम्

१८४ ॥ ॐ महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॐ ॥

१८५ ॥ ॐ उभयथापि न कर्मातस्तदभावः ॐ ॥

१८६ ॥ ॐ समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॐ ॥

१८७ ॥ ॐ नित्यमेव च भावात् ॐ ॥

१८८ ॥ ॐ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॐ ॥

१८९ ॥ ॐ उभयथा च दोषात् ॐ ॥

१९० ॥ ॐ अपरिग्रहाच्चात्यन्तमनपेक्षा ॐ ॥

## २।२।७ समुदायाधिकरणम्

१९१ ॥ ॐ समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॐ ॥

१९२ ॥ ॐ इतरेतरप्रत्ययत्वादिति चेन्न उत्पत्तिमात्रनिमित्तत्वात् ॐ ॥

१९३ ॥ ॐ उत्तरोत्पादे च पूर्वनिरोधात् ॐ ॥

१९४ ॥ ॐ असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॐ ॥

१९५ ॥ ॐ प्रतिसङ्ख्याऽप्रतिसन्ख्यानिरोधाप्राप्तिरविच्छेदात् ॐ ॥

१९६ ॥ ॐ उभयथा च दोषात् ॐ ॥

१९७ ॥ ॐ आकाशे चाविशेषात् ॐ ॥

१९८ ॥ ॐ अनुस्मृतेश्च ॐ ॥

## २।२।८ असदधिकरणम्

१९९ ॥ ॐ नासतोऽदृष्टत्वात् ॐ ॥

२०० ॥ ॐ उदासीनानामपि चैवं सिद्धिः ॐ ॥

२०१ ॥ ॐ नाभाव उपलब्धेः ॐ ॥

२०२ ॥ ॐ वैधर्म्याच्च न स्वप्नादिवत् ॐ ॥

## २।२।९ अनुपलब्ध्यधिकरणम्

२०३ ॥ ॐ न भावोऽनुपलब्धेः ॐ ॥

२०४ ॥ ॐ क्षणिकत्वाच्च ॐ ॥

२०५ ॥ ॐ सर्वथाऽनुपपत्तेश्च ॐ ॥

## २।२।१० नैकस्मिन्नधिकरणम्

२०६ ॥ ॐ नैकस्मिन्नसम्भवात् ॐ ॥

२०७ ॥ ॐ एवं चात्माकात्स्न्र्यम् ॐ ॥

२०८ ॥ ॐ न च पर्यायादप्यविरोधो विकारादिभ्यः ॐ ॥

२०९ ॥ ॐ अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषात् ॐ ॥

## २।२।११ पत्युरधिकरणम्

२१० ॥ ॐ पत्युरसामञ्जस्यात् ॐ ॥

२११ ॥ ॐ सम्बन्धानुपपत्तेश्च ॐ ॥

२१२ ॥ ॐ अधिष्ठानानुपपत्तेश्च ॐ ॥

२१३ ॥ ॐ करणवच्चेन्न भोगादिभ्यः ॐ ॥

२१४ ॥ ॐ अन्तवत्त्वमसर्वज्ञता वा ॐ ॥

## २।२।१२ उत्पत्त्यधिकरणम्

२१५ ॥ ॐ उत्पत्त्यसम्भवात् ॐ ॥

२१६ ॥ ॐ न च कर्तुः करणम् ॐ ॥

२१७ ॥ ॐ विज्ञानादिभावे वा तदप्रतिषेधः ॐ ॥

२१८ ॥ ॐ विप्रतिषेधाच्च ॐ ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु द्वितीयाध्यायस्य

द्वितीय पादः ॥ २॥२ ॥

# श्रीकृष्णद्वैपायनकृतब्रह्मसूत्राणि

## द्वितियोऽद्यायः-अविरोधाद्यायः

## ३ तृतियःपादः-श्रुतिनं परस्परविरोधपादः

### २।३।१ वियदधिकरणम्

२१९॥ ॐ न वियदश्रुतेः ॐ॥

२२०॥ ॐ अस्ति तु ॐ॥

२२१॥ ॐ गौण्यसम्भवात् ॐ॥

२२२॥ ॐ शब्दाच्च ॐ॥

२२३॥ ॐ स्याच्चैकस्य ब्रह्मशब्दवत् ॐ॥

२२४॥ ॐ प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॐ॥

२२५॥ ॐ यावद्विकारं तु विभागो लोकवत् ॐ॥

### २।३।२ मातरिश्वाधिकरणम्

२२६॥ ॐ एतेन मातरिश्वा व्याख्यातः ॐ॥

### २।३।३ असम्भवाधिकरणम्

२२७॥ ॐ असम्भवस्तु सतोऽनुपपत्तेः ॐ॥

### २।३।४ तेजोऽधिकरणम्

२२८॥ ॐ तेजोऽतस्तथा ह्याह ॐ॥

### २।३।५ अबधिकरणम्

२२९ ॥ ॐ आपः ॐ ॥

## २ ।३ ।६ पृथिव्यधिकरणम्

२३० ॥ ॐ पृथिव्यधिकाररूपशब्दान्तरादिभ्यः ॐ ॥

## २ ।३ ।७ तदभिध्यानाधिकरणम्

२३१ ॥ ॐ तदभिध्यानादेव तु तल्लिङ्गात्सः ॐ ॥

## २ ।३ ।८ विपर्याधिकरणम्

२३२ ॥ ॐ विपर्ययेण तु क्रमोऽत उपपद्यते च ॐ ॥

## २ ।३ ।९ अम्तराधिकरणम्

२३३ ॥ ॐ अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॐ ॥

२३४ ॥ ॐ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॐ ॥

## २ ।३ ।१० आत्माधिकरणम्

२३५ ॥ ॐ नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ॐ ॥

## २ ।३ ।११ ज्ञाधिकरणम्

२३६ ॥ ॐ ज्ञोऽत एव ॐ ॥

२३७ ॥ ॐ युक्तेश्च ॐ ॥

## २ ।३ ।१२ उत्क्राम्त्यधिकरणम्

२३८ ॥ ॐ उत्क्रान्तिगत्यागतीनाम् ॐ ॥

२३९ ॥ ॐ स्वात्मना चोत्तरयोः ॐ ॥

२४० ॥ ॐ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॐ ॥

२४१ ॥ ॐ स्वशब्दोन्मानाभ्यां च ॐ ॥

२४२ ॥ ॐ अविरोधश्चन्दनवत् ॐ ॥

२४३ ॥ ॐ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्दृदि हि ॐ ॥

२४४ ॥ ॐ गुणाद्वाऽऽलोकवत् ॐ ॥

## २ ।३ ।१३ व्यतिरेकाधिकरणम्

२४५ ॥ ॐ व्यतिरेको गन्धवत्तथा च दर्शयति ॐ ॥

## २ ।३ ।१४ पृथगधिकरणम्

२४६ ॥ ॐ पृथगुपदेशात् ॐ ॥

२४७ ॥ ॐ तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॐ ॥

## २ ।३ ।१५ यावदधिकरणम्

२४८ ॥ ॐ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॐ ॥

## २ ।३ ।१६ पुम्स्त्वाधिकरणम्

२४९ ॥ ॐ पुंस्त्वादिवत्वस्य सतोऽभिव्यक्तियोगात् ॐ ॥

२५० ॥ ॐ नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वान्यथा ॐ ॥

## २ ।३ ।१७ कर्तृत्वाधिकरणम्

२५१ ॥ ॐ कर्ता शास्त्रार्थवत्वात् ॐ ॥

२५२ ॥ ॐ विहारोपदेशात् ॐ ॥

२५३ ॥ ॐ उपादानात् ॐ ॥

२५४ ॥ ॐ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॐ ॥

२५५ ॥ ॐ उपलब्दिवदनियमः ॐ ॥

२५६ ॥ ॐ शक्तिदिपर्ययात् ॐ ॥

२५७ ॥ ॐ समाध्यभावाच्च ॐ ॥

२५८ ॥ ॐ सथा च तक्षोभयथा ॐ ॥

२५९। ।ॐ परात्तु तच्छ्रुतेः ॥

२६० ॥ ॐ कृतप्रयत्नापेक्ष्स्तु विहितप्रतिषेधावैयर्थ्यादिभ्यः ॐ ॥

## २ ।३ ।१८ अम्शाधिकरणम्

२६१ ॥ ॐ अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॐ ॥

२६२ ॥ ॐ मन्त्रवर्णात् ॐ ॥

२६३ ॥ ॐ अपि स्मर्यते ॐ ॥

२६४ ॥ ॐ प्राकाशादिवन्नैवं परः ॐ ॥

२६५ ॥ ॐ स्मरन्ति च ॐ ॥

२६६ ॥ ॐ अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् ॐ ॥

२६७ ॥ ॐ असन्ततेश्चाव्यतिकरः ॐ ॥

२६८ ॥ ॐ आभास एव च ॐ ॥

## २ ।३ ।१९ अदृष्टाधिकरणम्

२६९ ॥ ॐ अदृष्टानियमात् ॐ ॥

२७० ॥ ॐ अभिसन्ध्यादिष्वापि चैवम् ॐ ॥

२७१ ॥ ॐ प्रदेशादिति चेन्नान्तर्भावात् ॐ ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु द्वितीयाध्यायस्य

तृतीय पादः ॥ २॥ ३॥

# श्रीकृष्णद्वैपायनकृतब्रह्मसूत्राणि

## द्वितियोऽध्यायः-अविरोधाध्यायः

## ४ चतुर्थःपादः- न्यायोपेतश्रुत्यविरोधपादः

### २ ।४ ।१ प्राणोत्पत्त्यधिकरणम्

२७२ ॥ ॐ तथा प्राणाः ॐ ॥

२७३ ॥ ॐ गौण्यसम्भवात् ॐ ॥

२७४ ॥ ॐ प्रतिज्ञाऽनुपरोधाच्च ॐ ॥

### २ ।४ ।२ तत्प्रागधिकरणम्

२७५ ॥ ॐ तत्प्राक्श्रुतेश्च ॐ ॥

### २ ।४ ।३ तत्पुर्वकत्वाधिकरणम्

२७६ ॥ ॐ तत्पूर्वकत्वाद्वाचः ॐ ॥

### २ ।४ ।४ सप्तगत्यधिकरणम्

२७७ ॥ ॐ सप्त गतेर्विशेषितत्वाच्च ॐ ॥

२७८ ॥ ॐ हस्तादयस्तु स्थितेऽतो नैवम् ॐ ॥

### २ ।४ ।५ अण्वधिकरणम्

२७९ ॥ ॐ अणवश्च ॐ ॥

### २ ।४ ।६ श्रेष्ठाधिकरणम्

२८० ॥ ॐ श्रेष्ठश्च ॐ ॥

२८१ ॥ ॐ न वायुक्रिये पृथगुपदेशात् ॐ ॥

## २ ।४ ।७ चक्षुराद्यधिकरणम्

२८२ ॥ ॐ चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॐ ॥

२८३ ॥ ॐ अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॐ ॥

## २ ।४ ।८ पङ्चवृत्यधिकरणम्

२८४ ॥ ॐ पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॐ ॥

## २ ।४ ।९ अण्वधिकरणम्

२८५ ॥ ॐ अणुश्च ॐ ॥

## २ ।४ ।१० ज्योतिराद्यधिकरणम्

२८६ ॥ ॐ ज्योतिराद्याधिष्ठानं तु तदामननात् ॐ ॥

२८७ ॥ ॐ प्राणवता शब्दात् ॐ ॥

२८८ ॥ ॐ तस्य च नित्यत्वात् ॐ ॥

## २ ।४ ।११ त इन्द्रियाण्यधिकरणम्

२८९ ॥ ॐ त इन्द्रियाणि तव्द्यपदेशादन्यत्रश्रेष्ठात् ॐ ॥

२९० ॥ ॐ भेदश्रुतेः ॐ ॥

२९१ ॥ ॐ वैलक्षण्याच्च ॐ ॥

## २ ।४ ।१२ सङ्ज्ञाधिकरणम्

२९२ ॥ ॐ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॐ

## २ ।४ ।१३ माम्साधिकरणम

२९३ ॥ ॐ मांसादि भौमं यथाशब्दमितरयोश्च ॐ ॥

२९४ ॥ ॐ वैशेष्याच्चु तद्वादस्तद्वादः ॐ ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु द्वितीयाध्यायस्य

चतुर्थः पादः ॥ २ ॥ ४ ॥

www.madhvalibrary.org

# श्रीकृष्णद्वैपायनकृतब्रह्मसूत्राणि

## तृतियाध्यायः–साधनाद्यायः

## १ प्रथमः पादः – वैराग्यपादः

### ३ ।१ ।१ तदन्तराधिकरणम्

२९५ ॥ ॐ तदन्तरप्रतिपत्तौ रंहति सम्परीष्वक्तः प्रश्ननिरूपणाभ्याम् ॐ ॥

### ३ ।१ ।२ त्र्यात्मकत्वाधिकरणम्

२९६ ॥ ॐ त्र्यात्मकत्वात्तु भूयस्त्वात् ॐ ॥

### ३ ।१ ।३ प्राणगत्यधिकरणम्

२९७ ॥ ॐ प्राणगतेश्च ॐ ॥

### ३ ।१ ।४ अग्न्याद्यधिकरणम्

२९८ ॥ ॐ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॐ ॥

### ३ ।१ ।५ प्रथमेश्रवणाधिकरणम्

२९९ ॥ ॐ प्रथामे श्रवणादिति चेन्न ताव ह्युपपत्तेः ॐ ॥

### ३ ।१ ।६ अश्रुतत्वाधिकरणम्

३०० ॥ ॐ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॐ ॥

### ३ ।१ ।७ भाक्ताधिकरणम्

३०१ ॥ ॐ भाक्तं वाऽनात्मवित्वात्तथा हि दर्शयति ॐ ॥

### ३ ।१ ।८ कृतात्ययाधिकरणम्

३०२ ॥ ॐ कृतात्ययेऽनुशयवान्द्रष्टस्मृतिभ्याम् ॐ ॥

## ३ ।१ ।९ यथेताधिकरणम्

३०३ ॥ ॐ यथेतमनेवं च ॐ ॥

## ३ ।१ ।१० चरणाधिकरणम्

३०४ ॥ ॐ चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः ॐ ॥

३०५ ॥ ॐ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॐ ॥

३०६ ॥ ॐ सुकृतदुष्कृते एवेति तु बादरिः ॐ ॥

## ३ ।१ ।११ अनिष्टाधिकरणम्

३०७ ॥ ॐअनिष्टादिकारिणामपि च श्रुतम् ॐ ॥

३०८ ॥ ॐ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॐ ॥

३०९ ॥ ॐ स्मरन्ति च ॐ ॥

## ३ ।१ ।१२ अपिसप्ताधिकरणम्

३१० ॥ ॐ अपि सप्त ॐ ॥

## ३ ।१ ।१३ तत्राप्यधिकरणम्

३११ ॥ ॐ तत्रापि च तदव्यापारादविरोधः ॐ ॥

## ३ ।१ ।१४ विद्याधिकरणम्

३१२ ॥ ॐ विद्याकर्मणोरिति तु प्रकृतत्वात् ॐ ॥

## ३ ।१ ।१५ न तृतियाधिकरणम्

३१३ ॥ ॐ न तृतीये तथोपलब्धेः ॐ ॥

३१४ ॥ ॐ स्मर्यतेऽपि च लोके ॐ ॥

३१५ ॥ ॐ दर्शनाच्च ॐ ॥

३१६ ॥ ॐ तृतीये शब्दावरोधः संशोकजस्य ॐ ॥

३१७ ॥ ॐ स्मरणाच्च ॐ ॥

## ३ ।१ ।१६ तत्स्वाभाव्यापत्त्यधिकरणम्

३१८ ॥ ॐ तत्स्वाभाव्यापत्तिरुपपत्तेः ॐ ॥

## ३ ।१ ।१७ नातिचिरेणाधिकरणम्

३१९ ॥ ॐ नातिचिरेण विशेषात् ॐ ॥

## ३ ।१ ।१८ अन्याधिकरणम्

३२० ॥ ॐ अन्याधिष्ठिते पूर्ववदभिलापात् ॐ ॥

३२१ ॥ ॐ अशुद्धमिति चेन्न शब्दात् ॐ ॥

## ३ ।१ ।१९ रेतोऽधिकरणम्

३२२ ॥ ॐ रेतः सिग्योगोऽथ ॐ ॥

## ३ ।१ ।२० योन्यधिकरणम्

३२३ ॥ ॐ योनेः शरीरम् ॐ ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु तृतीयाध्यायस्य

प्रथमः पादः ॥ ३ ॥ १ ॥

# श्रीकृष्णद्वैपायनकृतब्रह्मसूत्राणि

## तृतियाध्यायः–साधनाद्यायः

## २ द्वितीयः पादः – भक्ति पादः

### ३ ।२ ।१ सन्ध्याधिकरणम्

३२४ ॥ ॐ सन्ध्ये सृष्टिराह हि ॐ ॥

३२५ ॥ ॐ निर्मातारं चैके पुत्रादयश्च ॐ ॥

३२६ ॥ ॐ मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात् ॐ ॥

३२७ ॥ ॐ सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॐ ॥

### ३ ।२ ।२ पराबिध्यानाधिकरणम्

३२८ ॥ ॐ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॐ ॥

### ३ ।२ ।३ देहयोगाधिकरणम्

३२९ ॥ ॐ देहयोगाद्वासोऽपि ॐ

### ३ ।२ ।४ तदभावाधिकरणम्

३३० ॥ ॐ तदभावो नाडीषु तच्छ्रुतेरात्मनि ह ॐ ॥

### ३ ।२ ।५ प्रबोधाधिकरणम्

३३१ ॥ ॐ अतः प्रबोधोऽस्मात् ॐ ॥

### ३ ।२ ।६ कर्मानुस्मृत्यधिकरणम्

३३२ ॥ ॐ स एव च कर्मानुस्मृतिशब्दविधिभ्यः ॐ ॥

## ३ ।२ ।७ सम्पत्यधिकरणम्

३३३ ॥ ॐ मुग्धेऽर्धसम्पत्तिः परिशेषात् ॐ ॥

## ३ ।२ ।८ न्स्थानतोऽप्यधिकरणम्

३३४ ॥ ॐ न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॐ ॥

३३५ ॥ ॐ न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॐ ॥

३३६ ॥ ॐ अपि चैवमेके ॐ ॥

## ३ ।२ ।९ आरूपाधिकरणम्

३३७ ॥ ॐ अरूपवदेव हि तत्प्रधानत्वात् ॐ ॥

३३८ ॥ ॐ  प्रकाशवच्चावैयर्थ्यम्  ॐ ॥

३३९ ॥ ॐ आह च तन्मात्रम् ॐ ॥

३४० ॥ ॐ दर्शयति चाथो अपि स्मर्यते ॐ ॥

## ३ ।२ ।१० उपमाधिकरणम्

३४१ ॥ ॐ अत एव चोपमा सूर्यकादिवत्  ॐ ॥

## ३ ।२ ।११ अम्बुवदधिकरणम्

३४२ ॥ ॐ अम्बुवदग्रहणात्तु न तथात्वम् ॐ ॥

## ३ ।२ ।१२ वृद्धिह्रासाधिकरणम्

३४३ ॥ ॐ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॐ ॥

३४४ ॥ ॐ दर्शनाच्च ॐ ॥

## ३ ।२ ।१३ प्रकृतैतावत्वाधिकरणम्

३४५ ॥ ॐ प्रकृतैतावत्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॐ ॥

## ३ ।२ ।१४ अव्यक्तत्वाधिकरणम्

३४६ ॥ ॐ तदव्यक्तमाह हि ॐ ॥

३४७ ॥ ॐ अपि संराधने प्रत्यक्षानुमानाभ्याम् ॐ ॥

३४८ ॥ ॐ प्रकाशवच्चावैशेष्यम् ॐ ॥

३४९ ॥ ॐ प्रकाशश्च कर्मण्यभ्यासात् ॐ ॥

३५० ॥ ॐ अतोऽनन्तेन तथा हि लिङ्गम् ॐ ॥

## ३ ।२ ।१५ अहिकुन्दलाधिकरणम्

३५१ ॥ ॐ उभयव्यपदेशात्वहिकुण्डलवत् ॐ ॥

३५२ ॥ ॐ प्रकाशाश्रयवद्वा तेजस्त्वात् ॐ ॥

३५३ ॥ ॐ पूर्ववद्वा ॐ ॥

३५४ ॥ ॐ प्रतिषेधाच्च ॐ ॥

## ३ ।२ ।१६ परमताधिकरणम्

३५५ ॥ ॐ परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॐ ॥

३५६ ॥ ॐ दर्शनात् ॐ ॥

३५७ ॥ ॐ बुद्ध्यर्थः पादवत् ॐ ॥

## ३ ।२ ।१७ स्थानविशेषाधिकरणम्

३५८ ॥ ॐ स्थानविशेषात्प्रकाशादिवत् ॐ ॥

३५९ ॥ ॐ उपपत्तेश्च ॐ ॥

## ३ ।२ ।१८ तथान्यत्वाधिकरणम्

३६० ॥ ॐ तथाऽन्यत्प्रतिषेधात् ॐ ॥

## ३ ।२ ।१९ सर्वगतत्वाधिकरणम्

३६१ ॥ ॐ अनेन सर्वगतत्वमायामयशब्दादिभ्यः ॐ ॥

## ३ ।२ ।२० फलाधिकरणम

३६२ ॥ ॐ फलमत उपपत्तेः ॐ ॥

३६३ ॥ ॐ श्रुतत्वाच्च ॐ ॥

३६४ ॥ ॐ धर्मं जैमिनिरत एव ॐ ॥

३६५ ॥ ॐ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॐ ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु तृतीयाध्यायस्य

द्वितीयः पादः ॥ ३ ॥ २ ॥

# श्रीकृष्णद्वैपायनकृतब्रह्मसूत्राणि

## तृतियाध्यायः -साधनाद्यायः

## ३ तृतियःपादः -उपासनापादः

### ३।३।१ सर्ववेदाधिकरणम्

३६६ ॥ ॐ सर्व वेदान्तप्रत्ययं चोदनाद्यविशेषात् ॐ ॥

३६७ ॥ ॐ भेदान्नेति चेदेकस्यामपि ॐ ॥

३६८ ॥ ॐ स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च ॐ ॥

३६९ ॥ ॐ सलिलवच्च तन्नियमः ॐ ॥

३७० ॥ ॐ दर्शयति च ॐ ॥

### ३।३।२ उपसम्हाराधिकरणम्

३७१ ॥ ॐ उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॐ ॥

३७२ ॥ ॐ अन्यथात्वं च शब्दादिति चेन्नाविशेषात् ॐ ॥

३७३ ॥ ॐ न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॐ ॥

३७४ ॥ ॐ संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॐ ॥

### ३।३।३ प्राप्त्यधिकरणम्

३७५ ॥ ॐ प्राप्तेश्च समञ्जसम् ॐ ॥

### ३।३।४ सर्वाभेदाधिकरणम्

३७६ ॥ ॐ सर्वाभेदादन्यत्रेमे ॐ ॥

## ३।३।५ आनन्दाधिकरणम्

३७७ ॥ ॐ आनन्दादयः प्रधानस्य ॐ ॥

## ३।३।६ प्रियशिरस्त्वाधिकरणम्

३७८ ॥ ॐ प्रियशिरस्त्वाद्यप्राप्तिरूपचयापचयौ हि भेदे ॐ ॥

## ३।३।७ इतराधिकरणम्

३७९ ॥ ॐ इतरे त्वर्थसामान्यात् ॐ ॥

## ३।३।८ आध्यानाधिकरणम्

३८० ॥ ॐ आध्यानाय प्रयोजनाभावात् ॐ ॥

३८१ ॥ ॐ आत्मशब्दाच्च ॐ ॥

## ३।३।९ आत्मगृहीत्यधिकरणम्

३८२ ॥ ॐ आत्मगृहीतिरितरवदुत्तरात् ॐ ॥

## ३।३।१० अन्वयाधिकरणम्

३८३ ॥ ॐ अन्वयादिति चेत्स्यादवधारणात् ॐ ॥

## ३।३।११ कार्याधिकरणम्

३८४ ॥ ॐ कार्याख्यानादपूर्वम् ॐ ॥

## ३।३।१२ समानाधिकरणम्

३८५ ॥ ॐ समान एवं चाभेदात् ॐ ॥

३८६ ॥ ॐ सम्बन्धादेवमन्यत्रापि ॐ ॥

## ३।३।१३ नवाधिकरणम्

३८७ ॥ ॐ न वा विशेषात् ॐ ॥

३८८ ॥ ॐ दर्शयति च ॐ ॥

## ३।३।१४ सम्भृत्यधिकरणम्

३८९ ॥ ॐ सम्भृति द्युव्याप्त्यपि चातः ॐ ॥

## ३।३।१५ पुरुशाधिकरणम्

३९० ॥ ॐ पुरुषविद्यायामपि चेतरेषामनाम्नानात् ॐ ॥

## ३।३।१६ वेदाधिकरणम्

३९१ ॥ ॐ वेधाद्यर्थभेदात् ॐ ॥

## ३।३।१७ हान्यधिकरणम्

३९२ ॥ ॐ हानौ तूपायनशब्दशेषत्वात्कुशाऽऽछन्दस्तुत्युपगानवत्तदुक्तम् ॐ ॥

३९३ ॥ ॐ साम्पराये तत्व्याभावात्तथा ह्यन्ये  ॐ ॥

## ३।३।१८ चन्दाधिकरणम्

३९४ ॥ ॐ छन्दत उभयाविरोधात् ॐ ॥

३९५ ॥ ॐ गतेरर्थवत्वमुभयथाऽन्यथा हि विरोधः ॐ ॥

३९६ ॥ ॐ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॐ ॥

## ३।३।१९ अनियमाधिकरणम्

३९७ ॥ ॐ अनियमः सर्वेषामविरोधाच्छब्दानुमानाभ्याम् ॐ ॥

## ३।३।२० यावदधिकरणम्

३९८ ॥ ॐ यावदधिकारमवस्थितिराधिकारिकाणाम् ॐ ॥

३९९ ॥ ॐ अक्षरधियां त्वविरोधः सामान्यतद्भावाभ्यामौप सदवत्तदुक्तम् ॐ ॥

## ३।३।२१ इयदामननाधिकरणम्

४०० ॥ ॐ इयदामननात् ॐ ॥

४०१ ॥ ॐ अन्तरा भूतग्रामवदिति चेतदुक्तम् ॐ ॥

४०२ ॥ ॐ अन्यथाभेदानुपपत्तिरिति चेन्नोपदेशवत् ॐ ॥

## ३।३।२२ व्यतिहाराधिकरणम्

४०३ ॥ ॐ व्यतिहारो विशिंषन्ति हीतरवत् ॐ ॥

## ३।३।२३ सत्याधिकरणम्

४०४ ॥ ॐ सैव हि सत्यादयः ॐ ॥

## ३।३।२४ कामाधिकरणम्

४०५ ॥ ॐ कामादितरत्र तंत्र चायतनादिभ्यः ॐ ॥

४०६ ॥ ॐ आदरादलोपः ॐ ॥

४०७ ॥ ॐ उपस्थितेस्तद्वचनात् ॐ ॥

## ३।३।२५ निर्धारणाधिकरणम्

४०८ ॥ ॐ तन्निर्धारणार्थानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॐ ॥

## ३।३।२६ प्रधानाधिकरणम्

४०९॥ ॐ प्रदानवदेवहि तदुक्तम् ॐ ॥

## ३।३।२७ लिङ्गभूयस्त्वाधिकरणम्

४१०॥ ॐ लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॐ ॥

## ३।३।२८ विकल्पाधिकरणम्

४११॥ ॐ पूर्वविकल्पःप्रकरणात्स्यात्क्रियामानसवत् ॐ ॥

४१२॥ ॐ अतिदेशाच्च ॐ ॥

## ३।३।२९ विद्याधिकरणम्

४१३॥ ॐ विद्यैव तु निर्धारणात् ॐ ॥

४१४॥ ॐ दर्शनाच्च ॐ ॥

## ३।३।३० श्रुत्यधिकरणम्

४१५॥ ॐ श्रुत्यादिबलीयस्त्वाच्च न बाधः ॐ ॥

## ३।३।३१ अनुबन्धाधिकरणम्

४१६॥ ॐ अनुबन्धादिभ्यः ॐ ॥

## ३।३।३२ प्रज्ञान्तराधिकरणम्

४१७॥ ॐ प्रज्ञान्तरपृथत्तववद्दृष्टिश्च तदुक्तम् ॐ ॥

## ३।३।३३ न समान्याधिकरणम्

४१८॥ ॐ न सामान्यादप्युपलब्धेमृत्युवन्न हि लोकापत्तिः ॐ ॥

## ३।३।३४ परेणाधिकरणम्

४१९ ॥ ॐ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्वनुबन्धः ॐ ॥

## ३।३।३५ एकाधिकरणम्

४२० ॥ ॐ एक आत्मनः शरीरे भावात् ॐ ॥

४२१ ॥ ॐ व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत् ॐ ॥

## ३।३।३६ अन्गावबद्धाधिकरणम्

४२२ ॥ ॐ अङ्गवबद्धास्तु न शाखासु हि प्रतिवेदम् ॐ ॥

४२३ ॥ ॐ मन्त्रादिवद्वाऽविरोधः ॐ ॥

## ३।३।३७ भुमाधिकरणम्

४२४ ॥ ॐ भूम्नः क्रतुवज्ज्यायस्त्वं तथा च दर्शयति ॐ ॥

## ३।३।३८ नाना शब्दाधिकरणम्

४२५ ॥ ॐ नानाशब्दादिभेदात् ॐ ॥

## ३।३।३९ विकल्पाधिकरणम्

४२६ ॥ ॐ विकल्पो विशिष्टफलत्वात् ॐ ॥

## ३।३।४० काम्याधिकरणम्

४२७ ॥ ॐ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पुर्वहेत्वभावात ॐ ॥

## ३।३।४१ अन्गाधिकरणम्

४२८ ॥ ॐ अङ्गेषु यथाश्रयभावः ॐ ॥

४२९ ॥ ॐ शिष्टेश्च ॐ ॥

४३० ॥ ॐ समाहारात् ॐ ॥

४३१ ॥ ॐ गुणसाधारण्यश्रुतेश्च ॐ ॥

## ३ ।३ ।४२ नवाधिकरणम्

४३२ ॥ ॐ न वाऽतत्सहभावश्रुतेः ॐ ॥

४३३ ॥ ॐ दर्शनाच्च ॐ ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु तृतीयाध्यायस्य

तृतीयः पादः ॥ ३ ॥ ३ ॥

# श्रीकृष्णद्वैपायनकृतब्रह्मसूत्राणि

## तृतियाध्यायः-साधनाद्यायः

## ४ चतुर्थःपादः -ज्ञानपादः

### ३ ।४ ।१ पुरुषार्थाधिकरणम्

४३४ ॥ ॐ पुरूषार्थोऽतः शब्दादिति बादरायणः ॐ ॥

४३५ ॥ ॐ शेषत्वात्पुरूषार्थवादो यथाऽन्येष्विति जैमिनिः ॐ

४३६ ॥ ॐ आचारदर्शनात् ॐ ॥

४३७ ॥ ॐ तच्छ्रुतेः ॐ ॥

४३८ ॥ ॐ समन्वारम्भणात् ॐ ॥

४३९ ॥ ॐ तद्वतो विधानात् ॐ ॥

४४० ॥ ॐ नियमाच्च ॐ ॥

४४१ ॥ ॐ अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॐ ॥

४४२ ॥ ॐ तुल्यं तु दर्शनम् ॐ ॥

### ३ ।४ ।२ अ सार्वत्रिक्यधिकरणम्

४४३ ॥ ॐ असार्वत्रिकि ॐ ॥

४४४ ॥ ॐ विभागः शतवत् ॐ ॥

४४५ ॥ ॐ अध्ययनमात्रवतः ॐ ॥

### ३ ।४ ।३ अविशेषाधिकरणम्

४४६ ॥ ॐ नाविशेषात् ॐ ॥

## ३।४।४ स्तुत्यधिकरणम्

४४७ ॥ ॐ स्तुतयेऽनुमतिर्वा ॐ ॥

४४८ ॥ ॐ कामकारेण ॐ ॥

४४९ ॥ ॐ उपमर्दं च ॐ ॥

४५० ॥ ॐ उर्ध्वरतस्सु च शब्दे हि ॐ ॥

४५१ ॥ ॐ परामर्शं जैमिनिरचोदना चापवदति हि ॐ ॥

४५२ ॥ ॐ अनुष्ठेयं बादरायणः साम्यश्रुतेः ॐ ॥

४५३ ॥ ॐ विधिर्वा धारणवत् ॐ ॥

४५४ ॥ ॐ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॐ ॥

४५५ ॥ ॐ भावशब्दाच्च ॐ ॥

४५६ ॥ ॐ परिप्लवार्था इति चेन्न विशेषितत्वात् ॐ ।

४५७ ॥ ॐ तथा चैकवाक्योपबन्धात् ॐ ॥

४५८ ॥ ॐ अत एव चाग्नीन्धनाद्यनपेक्षा ॐ ॥

४५९ ॥ ॐ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॐ ॥

४६० ॥ ॐ शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ॐ ॥

४६१ ॥ ॐ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॐ ॥

४६२ ॥ ॐ अबाधाच्च ॐ ॥

४६३ ॥ ॐ अपि स्मर्यते ॐ ॥

४६४ ॥ ॐ शब्दश्चातोऽकामचारे ॐ ॥

४६५ ॥ ॐ विहितत्वाच्चाश्रमकर्माऽपि ॐ ॥

४६६ ॥ ॐ सहकारित्वेन च ॐ ॥

## ३ ।४ ।५ उभयलिङ्गाधिकरणम्

४६७ ॥ ॐ सर्वथापि तु त एवोभयलिङ्गात् ॐ ॥

४६८ ॥ ॐ अनभिभवं च दर्शयति ॐ ॥

४६९ ॥ ॐ अन्तरा चापि तु तद्दृष्टेः ॐ ॥

४७० ॥ ॐ अपि स्मर्यते ॐ ॥

४७१ ॥ ॐ विशेषानुग्रहं च ॐ ॥

४७२ ॥ ॐ अतस्त्वितरज्ज्यायो लिङ्गाच्चॐ ॥

४७३ ॥ ॐ तद्भूतस्य तु तद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः ॐ ॥

## ३ ।४ ।६ अधिकारिकाधिकरणम्

४७४ ॥ ॐ न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॐ ॥

४७५ ॥ ॐ उपपुर्वमपीत्येके भावाशमनवत्तदुक्तम् ॐ ॥

४७६ ॥ ॐ बहिस्तूभयथापि स्मृतेराचाराच्च ॐ ॥

## ३ ।४ ।७ फलश्रुत्यधिकरणम्

४७७ ॥ ॐ स्वामिनः फलश्रुतेरित्यात्रेयः ॐ ॥

४७८ ॥ ॐ आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ॐ ॥

४७९ ॥ ॐ सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॐ ॥

## ३ ।४ ।८ कृत्स्नभावाधिकरणम्

४८० ॥ ॐ कृत्स्नभावात्तु गृहिणोपसंहारः ॐ ॥

४८१ ॥ ॐ मौनवदितरेषामप्युपदेशात् ॐ ॥

## ३ ।४ ।९ अन्वयाधिकरणम्

४८२ ॥ ॐ अनाविष्कुर्वन्नन्वयात् ॐ ॥

## ३ ।४ ।१० ऐहिकाधिकरणम्

४८३ ॥ ॐ ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॐ ॥

## ३ ।४ ।११ मुक्तिफलाधिकरणम्

४८४ ॥ ॐ एवं मुक्तिफलानियमस्तदवस्थावधृते स्तदवस्थावधृतेः ॐ ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु तृतीयाध्यायस्य

चतुर्थः पादः ॥ ३ ॥ ४ ॥

www.madhvalibrary.org

# श्रीकृष्णद्वैपायनकृतब्रह्मसूत्राणि

## चतुर्थाध्यायः-फलाध्याय

### १ प्रथमः पादः - कर्मक्षयपादः

### ४ ।१ ।१ अवृत्यधिकरणम्

४८५ ॥ ॐआवृत्तिरसकृदुपदेशात् ॐ ॥

४८६ ॥ ॐ लिङ्गाच्च ॐ ॥

### ४ ।१ ।२ आत्माधिकरणम्

४८७ ॥ ॐ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॐ ॥

### ४ ।१ ।३ न प्रतीकाधिकरणम्

४८८ ॥ ॐ न प्रतीके न हि सः ॐ ॥

### ४ ।१ ।४ ब्रह्माधिकरणम्

४८९ ॥ ॐ ब्रह्मद्ि्ष्टरूत्कर्षात् ॐ ॥

### ४ ।१ ।५ आदित्याधिकरणम्

४९० ॥ ॐ आदित्यादिमतयश्चाङ्ग् उपपत्तेः ॐ ॥

### ४ ।१ ।६ असीनाधिकरणम्

४९१ ॥ ॐ आसीनः सम्भवात् ॐ ॥

४९२ ॥ ॐ ध्यानाच्च ॐ ॥

४९३ ॥ ॐ अचलत्वं चापेक्ष्य ॐ ॥

४९४ ॥ ॐ स्मरन्ति च  ॐ ॥

४९५ ॥ ॐ यत्रैकाग्रता तत्राविशेषात् ॐ ॥

## ४ ।१ ।७ अप्रायणाधिकरणम्

४९६ ॥ ॐ आप्रायणात्तत्रापि हि दृष्टम् ॐ ॥

## ४ ।१ ।८ तदधिगमाधिकरणम्

४९७ ॥ ॐ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात ॐ

४९८ ॥ ॐ इतरस्याप्येवमसंश्लेषः पाते तु ॐ ॥

४९९ ॥ ॐ अनारब्धकार्ये एव तु सर्वे तदवधेः ॐ ॥

५०० ॥ ॐ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्  ॐ ॥

५०१ ॥ ॐ अतोऽन्य्दपीत्येकेषामुभयोः ॐ ॥

५०२ ॥ ॐ यदेव विद्ययेति हि ॐ ॥

५०३ ॥ ॐ भोगेन त्वितरे क्षपयित्वाथ सम्पत्स्यते ॐ ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु चतुर्थाध्यायस्य

प्रथमः  पादः ॥ ४ ॥ १ ॥

# श्रीकृष्णद्वैपायनकृतब्रह्मसूत्राणि

## चतुर्थाध्यायः-फलाध्याय

## २ द्वितीयः पादः -उत्क्रान्तिपादः

### ४ ।२ ।१ वाङ्ग्मनोधिकरणम्

५०४ ॥ ॐ वाङ्मनसि दर्शनाच्छब्दाच्च ॐ ॥

५०५ ॥ ॐ अत एव च सर्वाण्यनु ॐ ॥

### ४ ।२ ।२ मनः प्राणाधिकरणम्

५०६ ॥ ॐ तन्मनः प्राण उत्तरात् ॐ ॥

### ४ ।२ ।३ अध्यक्षाधिकरणम्

५०७ ॥ ॐ सोऽध्यक्षे तदुपगमादिभ्यः ॐ ॥

### ४ ।२ ।४ भूताधिकरणम्

५०८ ॥ ॐ भूतेषु तच्छ्रुतेः ॐ ॥

### ४ ।२ ।५ नैकस्मिनधिकरणम्

५०९ ॥ ॐ नैकस्मिन्दर्शयतो हि ॐ ॥

### ४ ।२ ।६ समनाधिकरणम्

५१० ॥ ॐ समना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॐ ॥

५११ ॥ ॐ तदपीतेः संसारव्यपदेशात् ॐ ॥

५१२ ॥ ॐ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॐ ॥

५१३ ॥ ॐ नोपमर्देनातः ॐ ॥

५१४ ॥ ॐ अस्यैव चोपपत्तेरूष्मा ॐ ॥

५१५ ॥ ॐ प्रतिषेधादिति चेन्न शारीरात् ॐ ॥

५१६ ॥ ॐ स्पष्टो ह्येकेषाम् ॐ ॥

५१७ ॥ ॐ स्मर्यते च ॐ ॥

## ४ ।२ ।७ पराधिकरणम्

५१८ ॥ ॐ तानि परे तथा ह्याह ॐ ॥

## ४ ।२ ।८ अविभागाधिकरणम्

५१९ ॥ ॐ अविभागो वचनात् ॐ ॥

## ४ ।२ ।९ तदोकोऽधिकरणम्

५२० ॥ ॐ तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो
विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॐ ॥

५२१ ॥ ॐ रश्म्यनुसारी ॐ ॥

५२२ ॥ ॐ निशि नेति चेन्न सम्बन्धात् ॐ ॥

५२३ ॥ ॐ यावद्देहभावित्वाद्दर्शयति च ॐ ॥

५२४ ॥ ॐ अतश्चायनेऽपि हि दक्षिणे ॐ ॥

## ४ ।२ ।१० योग्यधिकरणम्

५२५ ॥ ॐ योगिनः प्रतिस्मर्यते स्मार्ते चैते ॐ ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु चतुर्थाध्यायस्य

द्वितीयः पादः ॥ ४ ॥ २ ॥

www.madhvalibrary.org

# श्रीकृष्णद्वैपायनकृतब्रह्मसूत्राणि

## चतुर्थाध्यायः -फलाध्याय

## ३ तृतियःपादः - मार्गपादः

### ४ ।३ ।१ अर्चिराद्यधिकरणम्

५२६ ॥ ॐ अर्चिरादिनातत्प्रथितेः ॐ ॥

### ४ ।३ ।२ वायुशब्दाधिकरणम्

५२७ ॥ ॐ वायुशब्दादविशेषविशेषाभ्याम् ॐ ॥

### ४ ।३ ।३ तटितधिकरणम्

५२८ ॥ ॐ तटितोऽधिवरूणः सम्बन्धात् ॐ ॥

### ४ ।३ ।४ आतिवाहिकाधिकरणम्

५२९ ॥ ॐ अतिवाहिकस्तल्लिङ्गात् ॐ ॥

५३० ॥ ॐ उभयव्यामोहात्तत्सिद्धेः ॐ ॥

### ४ ।३ ।५ वैद्युताधिकरणम्

५३१ ॥ ॐ वैद्युतेनैव ततस्तच्छ्रुतेः ॐ ॥

### ४ ।३ ।६ कार्याधिकरणम्

५३२ ॥ ॐ कार्यं बादरिरस्य गत्युपपत्तेः ॐ ॥

५३३ ॥ ॐ विशेषितत्वाच्च ॐ ॥

५३४ ॥ ॐ सामीप्यात्तु तद्व्यपदेशः ॐ ॥

५३५ ॥ ॐ कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॐ ॥

५३६ ॥ ॐ स्मृतेश्च ॐ ॥

५३७ ॥ ॐ परं जैमिनिर्मुख्यत्वात् ॐ ॥

५३८ ॥ ॐ दर्शनाच्च ॐ ॥

५३९ ॥ ॐ न च कार्ये प्रतिपत्त्यभिसन्धिः ॐ ॥

५४० ॥ ॐ अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च ॐ ॥

५४१ ॥ ॐ विशेषं च दर्शयति ॐ ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रेषु तुर्थाध्यायस्य

तृतीयः पादः ॥ ४ ॥ ३ ॥

www.madhvalibrary.org

# श्रीकृष्णद्वैपायनकृतब्रह्मसूत्राणि

## चतुर्थाध्यायः-फलाध्याय

## ४ चतुर्थःपादः - भोगपादः

### ४ ।४ ।१ सम्पद्याधिकरणम्

५४२ ॥ ॐ सम्पद्याविहाय स्वेन शब्दात् ॐ ॥

### ४ ।४ ।२ मुक्ताधिकरणम्

५४३ ॥ ॐ मुक्तः प्रतिज्ञानात् ॐ ॥

### ४ ।४ ।३ आत्माधिकरणम्

५४४ ॥ ॐ आत्मा प्रकरणात् ॐ ॥

### ४ ।४ ।४ अविभागाधिकरणम्

५४५ ॥ ॐ अविभागेन दृष्टत्वात् ॐ ॥

### ४ ।४ ।५ ब्राह्माधिकरणम्

५४६ ॥ ॐ ब्राह्मेण जैमिनिरूपन्यासादिभ्यः ॐ ॥

५४७ ॥ ॐ चितिमात्रेण तदात्मकत्वादित्यौडुलोमिः ॐ ॥

५४८ ॥ ॐ एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॐ ॥

### ४ ।४ ।६ सन्कल्पाधिकरणम्

५४९ ॥ ॐ सङ्कल्पादेव च तच्छ्रुतेः ॐ ॥

## ४ ।४ ।७ अनन्याधिपत्यधिकरणम्

५५० ॥ ॐ अत एव चानन्याधिपतिः ॐ ॥

## ४ ।४ ।८ अभावाधिकरणम्

५५१ ॥ ॐ अभावं बादरिराह ह्येवम् ॐ ॥

५५२ ॥ ॐ भावं जैमिनिर्विकल्पाम्नानात् ॐ ॥

५५३ ॥ ॐ द्वादशाहवदुभयविधं बादरायणोऽतः ॐ ॥

५५४ ॥ ॐ तन्वभावे सन्ध्यवदुपपत्तेः ॐ ॥

५५५ ॥ ॐ भावे जाग्रद्वत् ॐ ॥

५५६ ॥ ॐ प्रदीपवदोशस्तथा हि दर्शयति ॐ ॥

५५७ ॥ ॐ स्वाप्ययसम्पत्योरन्यतरापेक्षमाविष्कृतं हि ॐ ॥

## ४ ।४ ।९ जगद्यापाराधिकरणम्

५५८ ॥ ॐ जगद्व्यापारवर्जम् ॐ ॥

५५९ ॥ ॐ प्रकरणादसन्निहितत्वाच्च ॐ ॥

५६० ॥ ॐ प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॐ ॥

५६१ ॥ ॐ विकारावर्ति च तथा हि दर्शयति ॐ ॥

## ४ ।४ ।१० स्थित्यधिकरणम्

५६२ ॥ ॐ स्थितिमाह दर्शयतश्चैवं प्रत्यक्षानुमाने ॐ ॥

५६३ ॥ ॐ भोगमात्रसाम्यलिङ्गाच्च ॐ ॥

## ४ ।४ ।११ अनावृत्त्यधिकरणम्

५६४ ॥ ॐ अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ॐ ॥

इति श्रीकृष्णद्वैपायनकृतब्रह्मसूत्रेषु चतुर्थाध्यायस्य

चतुर्थः पादः ॥ ४ ॥ ४ ॥

www.madhvalibrary.org